Shri Raghunath Temple MSS. Library,
JAMMU

No. १०९८-घ

Title १. रुद्रयामल तन्त्रे भवानी कवचम्
२. वराह पुराणे सूर्य स्तोत्रम्

Author

Extent १+१=२ Age

Subject तन्त्रम् (१) । पुराणम् (स्तो. मा.) (२)

क भवानीकवचम्

ख सूर्यस्तोत्रम्

१०५४

२५कि

कटिदेशं तु नाभिं भर्गस्तथैव च देवस्य मे तु हृदयं धीमही कंठमेव च धियो मे
पातु नासाग्रं यः परं चक्षुषी तथा ललाटं नः पदं पातु मूर्धानं मे प्रचोदयात् तस
दं पातु मूर्धानं सपादः पातु बालकं चक्षुषी मे विकारश्च श्रोत्रं रक्षेत्तु कारकः ना
सापुटं वकारस्तु रेकारस्तु कपोलकं णिकारस्तूत्तरोष्ठं च यंकारस्त्वधरोष्ठकं
आस्यमध्ये भकारस्तु गकारश्चिबुकं तथा देकारः कंठदेशं तु वकारः स्कंददे
शकं स्यकारो दक्षहस्तं तु धीकारो वामहस्तकं मकारो हृदयं रक्षेद्धिकारो जठ
रं तथा धिकारो नाभिदेशं तु योकारस्तु कटिं तथा योकारो मे रक्षेद्गुह्यं नकारो वतु
मेढ्रकं प्रकारो जानुनी रक्षेज्जंघे चोकारकस्तथा दकारो गुल्फदेशं तु याकारश्च
पदद्वयं इदं तु कवचं पुण्यं बाधाशतविनाशनं चतुःषष्टिकलाविद्याविलासे।
श्वर्यसिद्धिदं जपारंभे च गायत्र्या जपांते कवचं पठेत् इति श्रीब्रह्माविष्णुमहेश्व
रप्रोक्तं गायत्रीकवचं संपूर्णं १७ ॥ ॥ ॐ नमो भवान्यै नमः श्रीदेव्युवाच ॐ
देवदेव जगन्नाथ त्रैलोक्याभयदायक भवान्याः कवचं ब्रूहि त्रिषु लोकेषु दुर्लभं ॥
श्रीभैरवोवाच शृणु देवी प्रवक्ष्यामि भवानीकवचं परं विनामुना न सिद्धिः स्यात्सा
धकस्य महेश्वरी तस्माच्छृणु महादेवि कवचं परमाद्भुतं शृणु यासाठयेद्वापि प
ठते यस्तु मानवः स प्राप्नोति धनं पुत्रान्नायुर्दैव्याश्च दर्शनं ॐ अस्य श्रीभवानी

भ० कवचमंत्रस्य श्रीभैरवऋषिः अनुष्टुप्छंदः श्रीभवानीदेवता श्रीभवानीप्रीत्यर्थे
३ जपेपाठेविनियोगः ॐ ह्रीं श्रीं मे शिरः पायाद्देवी क्षेमंकरी स[illegible]दा ललाटं पातु
3 मे लक्ष्मी नेत्रे मे पातु सुंदरी श्रुती मे पातु भीरुंडा जया नासां सदावतु विजया पा
तु मे गंडौ मुखं मे पातु चंडिका स्कंधौ मे पातु चामुंडा कंठं मे रक्तदंतिका स्तनौ मे
पातु वाग्देवी भुजौ मे पातु कुब्जिका हृदयं पातु मे तारा कुक्षिं मे पातु नारिणी पार्श्वौ
मे पातु मातंगी नाभिं मे तोतुला वतु शिश्नं मे पातु सुमुखी गुह्यं श्रीगुह्यकेश्वरी मेढ्रं
मे शारिका पातु कटिं मे पातु कालिका ऊरू मे पातु वाराही जानु मे शारदावतु जंघे
महाबला पायाद्गुल्फौ श्रीगुह्यकालिका पादौ मे संततं पातु देवी श्रीभद्रकालिका
पादस्तलं पादपृष्ठं पायान्मे त्रिपुरेश्वरी शिरसः पादपर्यंतं भवानी पातु मे वपुः।
विस्मारितं तु यत्स्थानं यत्स्थानं नामवर्जितं तत्सर्वं पातु मे देवी भवानी भयनाशि
नी प्रभाते पातु मां शांता मध्याह्ने कालरात्रिकाः अपराह्णे महामाया रात्रौ राज्ञी
सदावतु अर्धरात्रे जगन्माता निशांते बगुलामुखी राजराजेश्वरी बंधो बांधं पा
तु मां शिवा व्रजंतं पातु मे दुर्गा तिष्ठंतं पार्वती तथा निषण्णं पातु मां नित्यं देवी
त्रिपुरभैरवी रणे राजकुले द्यूते विवादे शत्रुसंसदि भूतप्रेतपिशाचेषु रक्षेन्माप ३
रमेश्वरी इतीदं कवचं दिव्यं त्रिषु लोकेषु दुर्लभं यत्र तत्र न दृष्टव्यं यस्य कस्य न देय

सू० ४

[illegible]

शतं आद्या भवानी सर्वस्वं पुण्यं श्रीपुत्रोपवर्द्धनं सर्वापराधशमनं कीर्तिपुत्रधनप्र
दं सकृदुच्चारमात्रेण भुक्तिमुक्तिफलप्रदं पठनाद्धारणात्सत्यं सर्वान्कामान्नरो ल
भेत् गोप्यं गुप्ततरं साक्षात्कलौ निर्वाणदायकं भवान्याः कवचं भक्त्या गोपनीयं
स्वयोनिवत् इति श्रीरुद्रयामले तंत्रे भैरवसंवादे भवानीकवचं संपूर्णं २२ ॥ ॥
श्रीसूर्याय नमः ॐ सप्ताश्वरथमारूढो अरुणः सारथी समः श्वेतपद्मधरं देवं
त्वं सूर्य प्रणमाम्यहं १ बंधूकपुष्पसंकाशं हारकुंडलभूषितं एकचक्रधरं देवं त्वं
सूर्य० २ लोहितावर्णसंकाशं सर्वलोकपितामहं सर्वव्याधिहरं देवं त्वं सू० ३ ॥
त्वं देवं ईश्वरं शाकं ब्रह्माविष्णुमहेश्वरं परंब्रह्म परंज्ञानं त्वं सूर्य० ४ त्वं पृथ्वी आ
पतेजश्च वायुस्त्वाआकाशमेव च सर्वत्वं श्री जगन्नाथं त्वं सूर्य० ५ त्वं देवं लोककर्त्ता
रं कीर्तिकारणशोकरं रुद्रतेजोधरं देवं त्वं सूर्य० ६ अखंडमंडलाकारं जरा
जन्मविवर्जितं गगने लिंगमाराध्यं त्वं सूर्य० ७ निर्मलं निर्विकल्पं च निर्विका
रो निरामयं जगत्कर्त्ता जगत्हर्त्ता त्वं सूर्य० ८ सूर्यस्तोत्रं पठेन्नित्यं ग्रहपीडावि
नाशनं धनं धान्यं मनोवांछा श्रेयः प्राप्नोति नित्यशः ९ शिवरात्री सहस्राणि
कृत्वा जागरणं भवेत् तत्पुण्यं लभते सर्वं तत्फलं प्रणमाम्यहं १० अश्वमेधसह
स्राणि वाजपेयशतानि च कन्याकोटिसहस्राणि तत्फलं प्र० ११ गयायां पिंडदा
नेन पितॄणां च समुद्धरं दृष्ट्वा जागेश्वरं देवं त्वं० १२ अमरेश्वरसमं प्रेतं सोमनाथं तथैव च
कितनामा वा पापितरवि [illegible] सर्वलोके लगच्छति १३ इति श्री वाराह
पुराणे सूर्यस्तोत्रं संपूर्णं शुभं भवतु नारायणाय

४